# सूक्तय:

**आत्मन: प्रतिकूलानि परेषां न समाचरेत् ।।१।।**

यत् स्वार्थाय अनुकूलं न भवति, तत् अन्येषां कृते कदापि न करणीयम् ।

**अङ्गार: शतधौतेन मलिनत्वं न मुञ्चति ।।२।।**

सहजात: दुर्गुण: कथमपि न दूरीभवति ।

**उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।३।।**

उदारहृदया: जना: समग्रं विश्वं स्वपरिवारवत् चिन्तयन्ति ।

**हंसो हि क्षीरमादत्ते तन्मिश्राद् वर्जयत्यप: ।।४।।**

यथा हंस: क्षीरस्य नीरस्य च नीरं विहाय सारं क्षीरं गृह्णाति, तथैव विज्ञा: केवलं सारतत्वं गृह्णन्ति ।

**दीर्घदर्शी सदा च स्यात् चिरकारी भवेन्नहि ।।५।।**

दूरदृष्ट्या कार्यं कुर्य्यात् । परन्तु दीर्घसूत्री न भवेत् ।

## टिप्पणी

**शब्दार्थ: -**

प्रतिकूलानि - विपरीतभावान् (ବିପରୀତଭାବ), परेषां - अन्येषां, शत्रूणाम् (ଶତ୍ରୁମାନଙ୍କର) । शतधौतेन - बहुवारपरिमार्जनेन (ବହୁତ ଧୋଇଲେ ମଧ୍ୟ) । मलिनत्वम् - कालिमा (ମଳି) । न मुञ्चति - न त्यजति (ଛାଡ଼େ ନାହିଁ) । कुटुम्बकम् - कुटुम्बम्/ परिवार: (ପରିବାର) । आदत्ते - ग्रहणं करोति (ଗ୍ରହଣ କରେ) । वर्जयति - त्यजति (ଛାଡ଼େ) । अप: - जलानि (ପାଣି) । दीर्घदर्शी - दूरदशी (ଦୂରଦ୍ରଷ୍ଟା) । चिरकारी - दीर्घसूत्री / विलम्बी (ବିଳମ୍ବୀ) ।

## अभ्यास :

१. **रिक्तस्थानानि पूरयत ।**

(क) आत्मनः __________ कूलानि परेषां न __________ चेरत् ।

(ख) __________ शत __________ मलिनत्वं __________ मुञ्चति ।

(ग) हंसो हि __________ मादत्ते तन्मिश्राद् __________ त्यपः ।

(घ) __________ सदा च __________ चिरकारी भवे __________ ।

(ङ) __________ चरितानां __________ वसु __________ कुटुम्बकम् ।

२. **एकेन पदेन उत्तरं लिखत ।**

(क) शतधौतेन कः मलिनत्वं न मुञ्चति ?

(ख) कः क्षीरमादत्ते ?

(ग) वसुधा केषां कुटुम्बकम् ?

(घ) जनः कीदृशः स्यात् ?

(ङ) परेषां किं न समाचरेत् ?

३. **सन्धिं कुरुत ।**

वर्जयति + अपः, वसुधा + एव, क्षीरम् + आदत्ते, भवेत् + न

४. **अर्थं लिखत ।**

मुञ्चति, आदत्ते, अपः, चिरकारी, परेषाम्

५. एताः सूक्तीः कण्ठस्थीकुरुत ।

•